# श्री विष्णु सहस्त्रनाम स्तोत्रम्

शुक्लांबरधरं विष्णुं शशिवर्णं चथुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् । पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे । नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

अविकाराय शुद्धाय नित्याय परमात्मने । सदैक रूप रूपाय विष्णवे सर्वजिष्णवे ॥

यस्य स्मरण मात्रेण जन्मसंसारबन्धनात् । विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

॥ ॐ नमो विष्णवे प्रभविष्णवे ॥

श्रीवैशंपायन उवाच

शृत्वा धर्मानशेषेण पावानानि च सर्वशः । युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥

श्रीयुधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाऽप्येकं परायणम् । स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः । किं जपन् मुच्यते जन्तुर्जन्म संसारबन्धनात् ॥

श्रीभीष्म उवाच

जगत्प्रबुं देवदेवमनन्तं पुरुषोत्तमम् । स्तुवन् नामसहस्रेण पुरुषः सततोत्थितः ॥

तमेव चार्चयन् नित्यं भक्त्या पुरुषमव्ययम् । ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च ॥

अनाधिनिधनं विष्णुं सर्वलोकमहेश्वरम् । लोकाध्यक्षं स्तुवन् नित्यं सर्वदुःखातिगो भवेत् ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् । लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥

परमं यो महत्तेजः परमं यो महत्तपः । परमं यो महद्ब्रह्म परमं यः परायणम् ।

पवित्राणां पवित्रं यो मङ्गळानां च मङ्गळं । दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे । यस्मिन्श्च प्रळयं यान्ति पुनरेव युगक्षये ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते । विष्णोर्नामसहस्रं मे शृणु पाप भयापहम् ॥

यानि नामानि गौणानि विख्यातानि महात्मनः । ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः । छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः । त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् । अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमम् ॥

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्र महामन्त्रस्य । श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः ॥

श्री महाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।

अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः ।

उद्भवः क्षोभणो देव इति परमो मन्त्रः । शन्खभृन्नन्दकी चक्रीति कीलकम् ।

शार्ङ्गधन्वा गधादर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् ।

त्रिसाम सामगः सामेति कवचम् । आनन्दं परब्रह्मेति योनिः ।

ऋतुः सुदर्शनः काल इति दिग्भन्धः । श्रीविश्वरूप इति ध्यानम् ।

श्रीमहाविष्णुप्रीत्यर्थे सहस्रनामजपे विनियोगः ।

www.YouSigma.com

# ध्यानम्

क्षीरोदन्वत् प्रदेशे शुचिमणिविलसत् सैकते मौक्तिकानां माला क्लृप्तासनस्थः स्फटिकमणिनिभै मौक्तिकैर्मण्डिताङ्गः । शुभ्रै रभ्रै रदभ्रैः उपरि विचरितैः मुक्तपीयूषवर्षैः आनन्दी नः पुनीयादरिनळिन गदाशन्खपाणिर्मुकुन्दः ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौः मुखमपि दहनो यस्य वास्तेयमब्धिः ।

अन्तःस्तं यस्य विश्वं सुरनखगगो भोगि गन्धर्व दैत्यैः चित्रं रं रम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥

ॐ नमो भगवते वासुदेवाय

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।

लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

मेघश्यामं पीतकौशेयवासं श्रीवत्सान्कं कौस्तुभोद्भासिताङ्गम् ।

पुण्योपेतं पुण्दरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥

नमः समस्तभूतानां आदिभूताय भूभृते । अनेक रूपरूपाय विष्णवे प्रभविष्णवे ॥

सशन्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।

सहारवक्षःस्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम् ॥

छायायां पारिजातस्य हेमसिंहासनोपरि । आसीनं अंबुदश्यामं आयताक्षमलन्कृतम् ॥

www.YouSigma.com

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसम् । रुक्मिणीसत्यभामाभ्यं सहितं कृष्णमाश्रये ॥

www.YouSigma.com

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत् प्रभुः । भूतकृद् भूतभृद्भावो भूतात्म भूतबावनः ॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः । अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः । नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्यः । संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः । अनादिनिधनो धाता विधाता धातुरुत्तमः ॥

अप्रमेयो हृषीकेशः पद्मनाबोऽमरप्रभुः । विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः । प्रभूतस्तिककुब्धाम पवित्रं मङ्गळं परं ॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः । हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः । अनुत्तमो दुरादर्षः कृतज्ञः कृतिरात्मवान् ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः । अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः । वृषाकपिरमेयात्मा सर्वयोगविनिः सृतः ॥

वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः । अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥

रुद्रो बहुशिरा बभ्रुः विश्वयोनिः शुचिश्रवाः । अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः । वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः । चतुरात्मा चतुर्व्यूहः चतुर्दंष्ट्रः चतुर्भुजः ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुः जगदादिजः । अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः । अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः । अतीन्द्रियो महामायो महोत्साहो महाबलः ॥

महाबुद्धिः महावीर्यो महाशक्तिः महाद्युतिः । अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृक् ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः । अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः । हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः । अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः । निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुधारधीः ॥

अग्रणीः ग्रामणीः श्रीमान् न्यायो नेता समीरणः । सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः । अहः संवर्तको वह्निरनिलो धरणीधरः ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग् विश्वभुग् विभुः । सत्कर्ता सत्कृतः साधुः जहनुर्नारायणो नरः ॥

असन्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः । सिद्धार्थः सिद्धसन्कल्पः सिद्धिदः सिद्धिसाधनः ॥

वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः । वर्धनो वर्धमानश्च विविक्तः शृतिसागरः ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुधो वसुः । नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥

ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः । ऋद्धः स्पष्टाक्षरो मन्त्रः चन्द्रांशुर्भास्करद्युतिः ॥

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः । औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः । कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥

युगादिकृद् युगावर्तो नैकमायो महाशनः । अदृश्योऽव्यक्तरूपश्च सहस्रजितनन्तजित् ॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखन्डी नहुषो वृषः । क्रोधहा क्रोधकृत् कर्ता विश्वभाहुर्महीधरः ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः । अपां निधिरधिष्टानमप्रमत्तः प्रतिष्टितः ॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः । वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः । अनुकूलः शतावर्तः पद्मी पद्मनिभीक्षणः ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् । महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः । सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिन्जयः ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः । महीधरो महाभागो वेगवान मिताशनः ॥

www.YouSigma.com

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः । करणं कारणं कर्ता विकर्ता गहनो गुहः ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः । परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥

रामो विरामो विरतो मार्गो नेयो नयोऽनयः । वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः । हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः । उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥

विस्तारः स्थावरस्थाणुः प्रमाणं भीजमव्ययम् । अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः । नक्षत्रनेमीर्नक्षत्री क्षमः क्षामः समीहनः ॥

यज्ञ इज्यो महेज्यश्च ऋतुः सत्रं सतां गतिः । सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् । मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥

स्वापनः स्ववशो व्यापी नैकात्माऽनैककर्मकृत् । वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् । अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः । आदिदेवो महादेवो देवेशो देवभृद् गुरुः ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः । शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥

सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः । विनयो जयः सत्यसन्धो दाशार्हः सात्त्वतां पतिः ॥

जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः । अंभोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः । आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः । त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी । गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सन्कर्षणोऽच्युतः । वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः । आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥

www.YouSigma.com

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः । दिविस्पृक् सर्वदृग् व्यासो वाचस्पतिरयोनिजः ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् । सन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः । गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥

अनिवर्ती निवृत्तात्मा सन्क्षेप्ता क्षेमकृत् शिवः । श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः । श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः ॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः । विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥

उदीर्णः सर्वतश्चक्षुः अनीशः शाश्वतस्थिरः । भूशयो भूषणो भूतिः विशोकः शोकनाशनः ॥

अर्चिष्मान् अर्चितः कुंभो विशुद्धात्मा विशोधनः । अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः । त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥

कामदेवः कामपालः कामी कान्तः कृतागमः । अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनन्जयः ॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः । ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥

महाक्रमो महाकर्मा महातेजा महोरगः । महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः । पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः । वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥

सद्गतिः सत्कृतिः सत्ता सद्भूति सत्परायणः । शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः । दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥

विश्वमूर्तिः महामूर्तिः दीप्तमूर्तिः अमूर्तिमान् । अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् । लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी । वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥

अमानि मानदो मान्यो लोकस्वामी त्रिलोकधृत् । सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥

www.YouSigma.com

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः । प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥

चतुर्मूर्तिः चतुर्भाहुः चतुर्व्यूहः चतुर्गतिः । चतुरात्मा चतुर्भावः चतुर्वेद विदेकपात् ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः । दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः । इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः । अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः । महाह्रदो महागर्तो महाभूतो महानिधिः ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः । अमृतांशो अमृतवपुः सर्वज्ञः सर्वतोमुखः ॥

सुलभः सुव्रतः सिद्धः शत्रुजित् शत्रुतापनः । न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः । अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः ॥

अणुर्बृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान् । अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥

भारभृत् कथितो योगी योगीशः सर्वकामदः । आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः । अपराजितः सर्वसहो नियन्ता नियमोऽयमः ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः । अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः । रविर्विरोचनः सूर्यः सविता रविलोचनः ॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः । अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥

सनात् सनातनतमः कपिलः कपिरव्ययः । स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः । शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः । विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः । वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥

अनन्तरूपोऽनन्तश्रीः जितमन्युर्भयापहः । चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥

www.YouSigma.com

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः । जननो जनजन्मादिः भीमो भीमपराक्रमः ॥

आधारनिलयोधाता पुश्पहासः पजागरः । ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः । तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः । यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥

यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः । यज्ञान्त कृत् यज्ञगुह्यमन्न मन्नाद ऐव च ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः । देवकीनन्दनः स्त्रष्ठा क्षितीशः पापनाशनः ॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गधादरः । रताङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥

॥ श्री सर्वप्रहरणायुध ॐ नम इति ॥

वनमाली गदीशार्ङ्गी शन्खी चक्री च नन्दकी । श्रीमान् नारायणो विष्णुः वासुदेवोऽभिरक्शतु ॥

www.YouSigma.com

# फलश्रुतिः

इतीदं कीर्तनीयस्य केशवस्य महात्मनः । नाम्नां सहस्रं दिव्यानां अशेषेण प्रकीर्तितम् ॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् । नाशुभं प्राप्नुयात् किन्चित् सोऽमुत्रेव च मानवः ॥

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् । वैश्यो धनसमृद्धः स्यात् शूद्रः सुखमवाप्नुयात् ॥

धर्मार्थी प्राप्नुयाद्धर्मं अर्थार्थी चार्थमाप्नुयात् । कामानवाप्नुयात् कामि प्रजार्थी चाप्नुयात् प्रजाम् ॥

बक्तिमान् यः सदोत्थाय शुचिस्तद्गसमानसः । सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ॥

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च । अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥

न भयं क्वचिदाप्नोति वीर्यं तेज्श्च विन्दति । भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥

रोगार्तो मुच्यते रोगात्बद्धो मुच्येत बन्धनात् । भयान्मुच्येत भीतस्तु मुच्येताऽपन्न आपदः ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् । स्तुवन्नामसहस्रेण नित्यं भक्ति समन्वितः ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः । सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥

न वासुदेवभक्तानां अशुभं विद्यते क्वचित् । जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः । युज्येतात्मा सुखः शान्ति श्रीधृतिस्मृति कीर्तिभिः ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् । जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥

सर्वागमानामाचरः प्रथमं परिकल्प्यते । आचार प्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥

ऋषयः पितरो देवा महाभूतानि धातवः । जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥

www.YouSigma.com

योगो ज्ञानं तथा सान्ख्यं विध्या शिल्पादिकर्म च । वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनात् ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः । त्रीन् लोकान् व्याप्य भूतात्मा भुन्क्ते विश्व भुगव्ययः ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् । पठेद्य इच्छेत् पुरुषः श्रेयं प्राप्तुं सुखानि च ॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् । भजन्ति ये पुश्कराक्षं न ते यान्ति पराभवम् ॥

॥ न ते यान्ति पराभवम् ॐ नम इति ॥

अर्जुन उवाच – पद्म पत्रविशालाक्ष पद्मनाभ सुरोत्तम । भक्तानामनुरक्तानां त्राता भव जनार्दनः ॥

श्री भगवान् उवाचा – यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव । सोऽहमेकेन श्लोकेन स्तुत ऐव न संशयः ।

॥ स्तुत ऐव न संशय ॐ नम इति ॥

व्यास उवाचा – वासनाद्वासुदेवस्य वासितं ते जगत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ॥

॥ श्री वासुदेव नमोस्तु त ॐ नम इति ॥

पार्वत्युवाचा – केनोपायेन लघुना विष्णोर्नामसहस्रकं । पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥

ईश्वर उवाचा – श्रीराम राम रामेति रमे रामे मनोरमे । सहस्रनाम तत्तुल्यं रामनाम वरानने ॥

॥ श्रीरामनाम वरानन ॐ नम इति ॥

www.YouSigma.com

ब्रह्मोवाचा – नमस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्र कोटियुगधारिणे नमः ॥

॥ सहस्रकोटियुगधारिणे नम ॐ नम इति ॥

सन्जय उवाचा – यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

श्री भगवान् उवाचा – अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म संस्थापनार्थाय संभवामि युगे युगे ॥

आर्ता विषण्णाः शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः । सन्कीर्त्य नारायण शब्दमात्रं विमुक्त दुःखाः सुखिनो भवन्तु ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

www.YouSigma.com

# महालक्ष्म्याष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते । शंख–चक्र–गदा–हस्ते महालक्ष्मी नमोऽस्तु ते ॥

नमस्ते गरुडारूढे कोलासुर–भयङ्करी । सर्व–पाप–हरे देवि महालक्ष्मी नमोऽस्तु ते ॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करी । सर्व–दुःख–हरे देवि महालक्ष्मी नमोऽस्तु ते ॥

सिद्धि–बुद्धि–प्रदे देवि भुक्ति–मुक्ति–प्रदायिनी । मन्त्रमूर्ते सदा देवि महामक्ष्मी नमोऽस्तु ते ॥

आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि । योगजे योगसंभूते महालक्ष्मी नमोऽस्तु ते ॥

स्थूलसूक्ष्म–महारौद्रे महाशक्ति महोदरे । महापापहरे देवि महालक्ष्मी नमोऽस्तु ते ॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणी । परमेशी जगन्मातार्महालक्ष्मी नमोऽस्तु ते ॥

श्वेताम्बरधरे द्वि नानालङ्कारभूषिते । जगत्स्थिते जगन्मातर्महालक्ष्मी नमोऽस्तु ते ॥

महालक्ष्म्यष्टकं स्तोत्रं यः पठेद् भक्तिमान् नरः । सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥

ऐक–काले पठेन्नित्यं महापापविनाशनम् । द्विकालं यः पठेन्नित्यं धनधान्य–समन्विताः ॥

त्रिकालं यः पठेन्नित्यं महाशत्रु–विनाशनम् । महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

www.YouSigma.com

# श्री रामनाम सन्कीर्तनम्

वर्णानामर्थसन्घानां रसानां चन्दसामपि । मङ्गळानां च कर्तारौ वन्दे वाणीविनायकौ ॥

भवानिशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ । याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तः स्तमीश्वरम् ॥

वन्दे भोधमयं नित्यं गुरुं शङ्कररूपिणम् । यमाश्रितो हि वक्रोऽपि चन्द्रः सर्वत्र वन्द्यते ॥

सीता राम गुणग्राम पुण्यारण्य विहारिणौ । वन्दे विशुद्ध विज्ञानौ कवीश्वर कपीश्वरौ ॥

उद्भव स्थिति संहार कारिणीं क्लेश हारिणीम् । सर्व श्रेयस्करीं सीतां नतोऽहं राम वल्लभाम् ॥

यन्मायावश वर्ति विश्वमखिलं ब्रह्मादि देवासुराः । यत्सत्त्वात् अमृषेव भाति सकलं रज्जौ यथाऽहेर्भ्रमः ॥

यत्पादः प्लवमेव भाति हि भवांभोधेस्ति तीर्षावताम् । वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥

प्रसन्नतां या न गताभिषेकतः तथा न मम्लौ वनवासदुःखतः । मुखांबुजश्री रघुनन्दनस्य मे सदाऽस्तु सा मन्जुळ मङ्गळप्रदा ॥

नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम् । पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

मूलं धर्मतरोर्विवेकजलधेः पूर्णेन्दुमानन्दनं वैराग्यांबुजभास्करं त्वघहरं द्वान्तापहं तापहम् । मोहांभोधर पुञ्जपाटनविधौ खेसम्भवं शङ्करम् । वन्दे ब्रह्मकुलकळङ्कशमनं श्रीराम भूपं प्रियम् ॥

सान्द्रानन्दपयोदसौभगतनुं पीताम्बरं सुन्दरं पाणौ भाणशरासनं कटिलसत् तोणीरभारं वरम् । राजीवायतलोचनं धृतजटाजूटेन संशोभितं सीतालक्ष्मणसंयुतं पथिगतं रामाभिरामं भजे ॥

कुन्देदीवरसुन्दरावतिबलौ विज्ञान धामावुभौ शोभाढ्यौ वरधन्विनौ श्रुतिनुतौ गोविप्र वृन्दप्रियौ । मायामानुषरूपिणौ रघुवरौ सद्धर्मवर्मौ हि तौ सीतान्वेषणतत्परौ पथिगतौ भक्तिप्रदौ तौ हि नः ॥

www.YouSigma.com

ब्रह्मांभोधिसमुद्भवं कलिमलप्रद्वंसनं चाव्ययं श्रीमच्छम्भुमुखेन्दुसुन्दरवरे संशोभितं सर्वदा । संसारामयभेषजं सुमधुरं श्रीजानकीजीवनं धन्यास्ते कृतिनः पिबन्ति सततं श्रीरामनामामृतम् ॥

शान्तं शाश्वतमप्रमेयमनघं निर्वाणशान्तिप्रदं ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् । रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिं वन्देऽहं करुणाकरं रघुवरं भूपालचूडामणिम् ॥

केकीकण्ठाभनीलं सुरवरविलसद् विप्रपादाब्जचिह्नम् । शोभाढ्यं पीतवस्त्रं सरसिजनयनं सर्वदा सुप्रसन्नम् । पाणौ नाराचचापं कपिनिकरयुतं बन्धुनासेव्यमानं नौमीड्यं जानकीशं रघुवरमनिशं पुष्पकारूढरामम् ॥

आर्तानामार्तिहन्तारं भीतानां भयनाशनम् । द्विषतां कालदन्डं तं रामचन्द्रं नमाम्यहम् ॥

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वय रत्नदीपम् । आजानुभाहुं अरविन्द दळायताक्षं रामं निशाचरविनाशकरं नमामि ॥

वैदेहिसहितं सुरद्रुमतले हैमे महामण्डपे मध्येपुष्पकमासने मणिमये वीरासने संस्थितम् । अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

नान्या स्प्रहा रघुपते हृदयेऽस्मदीये सत्यं वदामि च भवान् अखिलान्तरात्मा ।
भक्तिं प्रयच्च रघुपुङ्गव निर्भरां मे कामादिदोषरहितं कुरु मानसं च ॥

श्री सीतालक्ष्मण भरत शतृघ्न हनुमत्समेत श्री रामचन्द्र परब्रह्मणे नमः

www.YouSigma.com

# श्रीनामरामयणम्

शुद्धब्रह्म परात्पर राम कालात्मक परमेश्वर राम

शेषतल्पसुखनिद्रित राम ब्रह्माद्यमरप्रार्थित राम

चण्डकिरणकुलमण्डन राम श्रीमद्दशरथनन्दन राम

कौसल्यासुखवर्धन राम विश्वामित्रप्रियधन राम

घोरताटकाघातक राम मारीछादिनिपातक राम

कौशिकमखसंरक्षक राम श्रीमदहल्योद्धारक राम

गौतममुनिसंपूजित राम सुरमुनिवरगणसंस्तुत राम

नाविकधावितमृदुपद राम मिथिलापुरजनमोहक राम

विदेहमानसरञ्जक राम त्र्यंबककार्मुकभञ्जक राम

सीतार्पितवरमालिक राम कृतवैवाहिककौतुक राम

भार्गवदर्पविनाशक राम श्रीमदयोध्यापालक राम

शुद्धब्रह्म परात्पर राम कालात्मक परमेश्वर राम

अगणितगुणगणभूषित राम अवनीतनयाकामित राम

राकाचन्द्रसमानन राम पितृवाक्याश्रितकानन राम

प्रियगुहविनिवेदितपद राम तत् क्षाळितनिजमृदुपद राम

भरद्वाजमुखानन्दक राम चित्रकूटाद्रिनिकेतन राम

www.YouSigma.com

दशरथसन्ततचिन्तित राम कैकेयीतनयार्थित राम
विरचितनिजपितृकर्मक राम भरतार्पितनिजपादुक राम
शुद्धब्रह्म परात्पर राम कालात्मक परमेश्वर राम

दण्डकवनजनपावन राम दुष्टविराधविनाशन राम
शरभङ्गसुतीक्ष्णार्चित राम अगस्त्यानुग्रहवर्धित राम
ग्रध्राधिपसंसेवित राम पञ्चवटीतटसुस्थित राम
शूर्मणखार्तिविधायक राम खरदूषणमुखसूदक राम
सीताप्रिय हरिणानुग राम मारीचार्तिकृदाशुग राम
विनष्टसीतान्वेषक राम गृध्राधिपगतिदायक राम
शबरीदत्तफलाशन राम कबन्धबाहुच्छेदन राम
हनुमत्सेवितनिजपद राम नतसुग्रीवाभीष्टद राम
गर्वितवालिसंहारक राम वानरदूतप्रेषक राम
हितकरलक्ष्मणसंयुत राम

कपिवरसन्तत संस्कृत राम तद्गतिविघ्नध्वंसक राम
सीताप्राणाधारक राम दुष्टदशाननदूषित राम
शिष्टहनूमद्भूषित राम सीतावेदितकाकावन राम
कृतचूडामणिदर्शन राम कपिवरवचनाश्वासित राम

www.YouSigma.com

रावणनिधनप्रस्थित राम वानरसैन्यसमावृत राम

शोषितसरिदीशार्थित राम विभीषणाभयदायक राम

पर्वतसेतुनिबन्धक राम कुंभकर्णशिरच्छेदक राम

राक्षससङ्घविमर्दक राम अहिमहिरावणचारण राम

संहृतदशमुखरावण राम विधिभवमुखसुरसंस्तुत राम

खस्थितदशरथवीक्षित राम सीतादर्शनमोदित राम

अभिषिक्तविभीषणनत राम पुष्पकयानरोहण राम

भरद्वाजाभिनिषेवण राम भरतप्राणप्रियकर राम

साकेतपुरीभूषण राम सकलस्वीयसमानत राम

रत्नलसत्पीठस्थित राम पट्टाभिषेकालङ्कृत राम

पार्थिवकुलसन्मानित राम विभीषणार्पितरञ्जक राम

कीशकुलानुग्रहकर राम सकलजीवसंरक्षक राम

समस्तलोकाधारक राम

शुद्धब्रह्म परात्पर राम कालात्मक परमेश्वर राम

आगतमुनिगणसंस्तुत राम विषृतदशकण्ठोद्भव राम

सीतालिङ्गननिवृत राम नीतिसुरक्षितजनपद राम

विपिनत्याजितजनकज राम कारितलवणासुरवध राम

स्वर्गतशम्बूकसंस्तुत राम स्वतनयकुशलवनन्दित राम

अश्वमेधक्रतुदीक्षित राम कालावेदितसुरपद राम

www.YouSigma.com

अयोध्यकजनमुक्तिद राम विधिमुखविबुधानन्दक राम

तेजोमयनिजरूपक राम संसृतिबन्धविमोचक राम

धर्मस्थापनतत्पर राम भक्तिपरायणमुक्तिद राम

सर्वचराचरपालक राम नित्यानन्दपदस्थित राम

राम राम जय राजा राम राम राम जय सीता राम

भयहर मङ्गळ दशरथ राम जय जय मङ्गळ सीता राम मङ्गळकर जय मङ्गळ राम सङ्गत शुभ विभवोदय राम

आनन्दामृत वर्षक राम आश्रित वत्सल जय जय राम रघुपति राघव राजा राम पतित पावन सीता राम

आपदामपहर्तारं दातारं सर्वसंपदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

रामाय रामचन्द्राय रामभद्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥

अतुलित बलधामं स्वर्णशैलाभदेहं दनुजवनकृशानुं ज्ञानिनामग्रगण्यं । सकलगुणनिधानं वानराणामधीशं रघुपतिवरदूतं वातजातं नमामि ॥

गोष्पदीकृतवारीशं मशकीकृतराक्षसं रामायण महामाला रत्नं वन्देनिलात्मजम् ।

अन्जनानन्दनं वीरं जानकीशोकनाशनं कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥

उल्लन्ध्य सिन्धो सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।

आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयं ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

www.YouSigma.com

आञ्जनेयं अतिपाटलाननं काञ्चनाद्रिकमनीय विग्रहं ।

पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्रकृतमस्तकाञ्जलिम् ।

भाष्पावारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

॥ इति अश्टोत्तरशतनामरामायणम् ॥

www.YouSigma.com

# हनुमान् चालीसा

श्री गुरु चरन सरोजरज निज मनु मुकुर सुधारि। भरनउँ रघुबर बिमल जसु जो दायकु फल चारि ॥

बिद्धिहीन तनु जानिके सुमिरौं पवन कुमार। बल बुद्धि विद्या देहु मोहि हरहु कलेस विकार ॥

जय हनुमान ज्ञान गुन सागर। जय कपीस तिहुँ लोक उजागर ॥

रामदूत अतुलित बलधाम। अंजनि पुत्र पवनसुत नामा ॥

महावीर विक्रम बजरंगी। कुमति निवार सुमतिके संगी ॥

कंचन वरन विराज सुवेसा। कानन कुंडल कुंचित केसा ॥

हाथ वज्र औ ध्वजा विराजै। काँधे मूँज जनेऊ साजै ॥

संकर सुवन केसरी नन्दन। तेज प्रताप महा जग बन्दन ॥

विद्यावन गुनी अति चातुर। राम काज करिवे को आतुर ॥

प्रभु चरित्र सुनिवे को रसिया। राम लखन सीता मन बसिया ॥

सूक्ष्म रूप धरि सियहिं दिखाव। विकट रूप धरि लंक जरावा ॥

भीम रूप धरि असुर सँहारे। रामचन्द्र के काज सँवारे ॥

लाय संजीवन लखन जियाये। श्रीरघुबीर हरषि उर लाये ॥

रघुपति कीन्ही बहुत बड़ाई। तुम मम प्रिय भरतही सम भाई ॥

सहस बदन तुम्हारो जस गावैं। अस कहि श्रीपति कंठ लगावैं ॥

सनकादिक ब्रह्मादि मुनीसा। नारद सारद सहित अहीसा ॥

जम कुबेर दिगपाल जहाँ ते। कवि कोबिद कहि सके कहाँ ते ॥

तुम उपकार सुग्रीवहिं कीन्हा। राम मिलाय राजपद दीन्हा ॥

www.YouSigma.com

तुम्हरो मन्त्र विभिषन माना । लंकेश्वर भए सब जग जाना ॥

युग सहस्त्र जोजन पर भानू । लील्यो ताहि मधुर फल जानू ॥

प्रभु मुद्रिका मेलि मुख माहीं । जलधि लाँघि गये अचरज नाहीं ॥

दुर्गम काज जकत के जेते । सुगम अनुग्रह तुम्हरे तेते ॥

राम दुआरे तुम रखवारे । होत न आज्ञा बिनु पैसारे ॥

सब सुख लहै तुम्हारि सरना । तुम रक्षक काहू को डरना ॥

आपन तेज सम्हारो आपै । तीनों लोक हाँक तें काँपै ॥

भूत पिसाच निकट नहिं आवै । महावीर जब नाम सुनावै ॥

नासै रोग हरै सब पीरा । जपत निरन्तर हनुमत वीरा ॥

संकट तें हनुमान छुड़ावै । मन क्रम वचन ध्यान जो लावै ॥

सब पर राम तपस्वी राजा । तिन के काज सकल तुम साजा ॥

और मनोरथ जो कोई लावै । सोइ अमित जीवन फल पावै ॥

चारों युग परताप तुम्हारा । है प्रसिद्ध जगत उजियारा ॥

साधु सन्त के तुम रखवारे । असुर निकन्दन राम दुलारे ॥

अष्ट सिद्धि नौ निधि के दाता । अस वर दीन जानकी माता ॥

राम रसायन तुम्हरे पासा । सदा रहो रघुपति के दासा ॥

तुम्हरे भजन रामको पावै । जनम जनम के दुख बिसरावै ॥

अन्त काल रघुबर पुर जाई । जहाँ  जन्म हरि भक्त कहाई ॥

और देवता चित्त न धरई । हनुमत सेई सर्व सुख करई ॥

संकट कटै मिटै सब पीरा । जो सुमिरै हनुमत बलबीरा ॥

www.YouSigma.com

जै जै जै हनुमान गोसाईं । कृपा करहु गुरुदेव की नाई ॥

जो सत बार पाठ कर जोई । छूटहि बंदि महा सुख होई ॥

जो यह पढ़ै हनुमान चालीसा । होय सिद्धि साखी गौरीसा ॥

तुलसीदास सदा हरि चेरा । कीजै नाथ हृदय महँ डेरा ॥

पवन तनय संकट हरन मंगल मूरुति रूप । राम लखन सीता सहित हृदय बसहु सुर भूप ॥

www.YouSigma.com

# श्रीवेन्कटेशमङ्गलाशासनम्

श्रियःकान्ताय कल्याणनिधये निधयेर्थिनाम् । श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम् ॥

लक्ष्मीसविभ्रमालोकसुभ्रू विभ्रम चक्षुषे । चक्षुषे सर्वलोकानां वेन्कटेशाया मङ्गळम् ॥

श्रीवेङ्कटाद्रिशृङ्गाग्रमङ्गळाभरणाङ्घ्रये । मङ्गळानां निवासाय श्रीनिवासाय मङ्गळम् ॥

सर्वावयवसौन्दर्यसंपदा सर्वचेतसाम् । सदा सम्मोहनायास्तु वेन्कटेशाया मङ्गळम् ॥

नित्याय निरवद्याय सत्यानन्द चिदात्मने । सर्वान्तरात्मने श्रीमद्वेन्कटेशाया मङ्गळम् ॥

स्वतसर्वविदे सर्वशक्तये सर्वशेषिणे । सुलभाय सुशीलाय वेन्कटेशाया मङ्गळम् ॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने । प्रयुन्जे परतत्त्वाय वेन्कटेशाया मङ्गळम् ॥

आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम् । अतृप्त्यमृतरूपाय वेन्कटेशाया मङ्गळम् ॥

प्रायस्स्वचरणौ पुंसां शण्यत्वेनपाणिना । कृपयादिशते श्रीमद्वेन्कटेशाया मङ्गळम् ॥

दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः । अपाङ्गैः सिञ्चते विश्वं वेन्कटेशाया मङ्गळम् ॥

स्त्रग्बूषांबरहेतीनां सिषुमावहमूर्तये । सर्वार्तिशमदायास्तु वेन्कटेशाया मङ्गळम् ॥

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे । रमया रममाणाय वेन्कटेशाया मङ्गळम् ॥

श्रीमत्सुन्दरजामातृमुनिमानसवासिने । सर्वलोकनिवासाय श्रीनिवासाय मङ्गळम् ॥

मङ्गळाशासनपरैर्मदाचार्य पुरोगमैः । सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गळम् ॥

www.YouSigma.com

# भगवदर्पणं

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणाऽपान समायुक्तः पचाम्यन्नं चतुर्विधम् ॥

हरिर्धाताः हरिर्भोक्ताः हरिरन्नं प्रजापतिः । हरिर्विप्रः शरीरस्तु भुन्क्ते भोजयते हरिः ॥

www.YouSigma.com